चुच्यन्-न्ती, चुच्ययन्-न्ती, चुचुच्यिषन्-न्ती ; —
चुच्यिष्यन्-न्ती-ती, चुच्ययिष्यन्-न्ती-ती, चुचुच्यिषिष्यन्-न्ती-ती ; —
— चुच्यमानः, चुच्ययिष्यमाणः, [1]चोचुच्य्यमानः, चोचुच्यिष्यमाणः;
[2]सुचुक्-सुचुच्यौ-सुचुच्यः ; — — —
[3]चुच्यितम्-तः, चुच्यितः, चुचुच्यिषितः, चोचुच्यितः-तवान् ;
चुच्यः, चुच्यः, चुचुच्यिषुः, चोचुच्यः ;
चुच्यितव्यम्, चुच्ययितव्यम्, चुचुच्यिषितव्यम्, चोचुच्यितव्यम्;
चुच्यनीयम्, चुच्यनीयम्, चुचुच्यिषणीयम्, चोचुच्यनीयम् ;
[4]चुच्य्यम्-चुच्यम्, चुच्यम्, चुचुच्यिष्यम्, चोचुच्य्यम्;
ईषच्चुच्यः-दुश्चुच्यः-सुचुच्यः; — — —
चुच्य्यमानः-चुच्यमानः, चुच्यमानः, चुचुच्यिष्यमाणः, चोचुच्य्यमानः;
चुच्यः, चुच्यः, चुचुच्यिषः, चोचुच्यः;
चुच्यितुम्, चुच्ययितुम्, चुचुच्यिषितुम्, चोचुच्यितुम् ;

---

सति, लघूपधगुणमाशङ्क्य, 'न धातुलोप—' (1-1-4) इति निषेधात्, स्थानिवद्भावाद्वा, लघूपधगुणाभावे, **'चोचुचिता'** इति यकाररहितमेकं रूपम्, 'हलो यमां-' (8-4-64) इति लोपस्य वैकल्पिकत्वात्, लोपाभावपक्षे च यकारघटितं **'चोचुच्यिता'** इति रूपान्तरमुक्तम्। अत्र, 'हलो यमाम्—' (8-4-64) इत्यस्य त्रैपादिकत्वेन, पूर्वमप्रवृत्तौ, 'यस्य हलः' (6-4-49) इति यकारलोपे यम्परत्वाभावेन, 'हलो यमाम्-' (8-4-64) इत्यस्यानन्तरमप्रवृत्तौ यकारघटितमेव रूपं शास्त्रानुगतमिति प्रतिभाति। सुधियोऽस्य तत्त्वं विभावयन्तु ।

1. यङन्ताच्छानचि, धातुयकारयङ्यकारयोरुभयोरपि श्रवणम् ।

2. 'वेरपृक्तलोपाद् वलि लोपो विप्रतिषेधेन' (वा.1-4-2) इति, धातुयकारस्य, 'लोपो व्योर्वलि' (6-1-66) इति लोपेनापहारे, 'चोः कुः' (8-2-30) इति पदान्ते चकारस्य ककारः ।

3. धातोरस्योदात्तत्वादिडागमे **चुच्यितम्** इति रूपम् । **क्षीरस्वामिना** **'चुच्यी'** इति ईदित्पाठमवलम्ब्य, 'श्वीदितो निष्ठायाम्' (7-2-14) इति निष्ठायामिडभावमवलम्ब्य यकारस्य वलि लोपे, कुत्वे च **चुक्तः** इत्यङ्गीकृतम् ।

4. हलन्तत्वेन, 'ऋहलोर्ण्यत्' (3-1-124) इति ण्यत्प्रत्यये, 'हलो यमाम्—' (8-4-64) इति लोपस्य वैकल्पिकत्वात्, कदाचिद् द्वियकारघटितं रूपम्, कदाचिच्च एकयकारघटितमिति रूपद्वयम् । एवं यगन्तेऽपि ज्ञेयम् ।